# Shri Vaidyanatha Stotram

# श्रीवैद्यनाथस्तोत्रम्

## Document Information

Text title : vaidyanAthastotram 06 22

File name : vaidyanAthastotram.itx

Category : shiva

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : Frm stotrArNavaH 06-22

Acknowledge-Permission: http://kshetrayaatra.blogspot.com

Latest update : July 27, 2018

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 11, 2021

*sanskritdocuments.org*

# श्रीवैद्यनाथस्तोत्रम्

अचिकित्सचिकित्साय आद्यन्तरहिताय च ।
सर्वलोकैकवन्द्याय वैद्यनाथाय ते नमः ॥ १॥

अप्रेमेयाय महते सुप्रसन्नमुखाय च ।
अभीष्टदायिने नित्यं वैद्यनाथाय ते नमः ॥ २॥

मृत्युञ्जयाय शर्वाय मृडानीवामभागिने ।
वेदवेद्याय रुद्राय वैद्यनाथाय ते नमः ॥ ३॥

श्रीरामभद्रवन्द्याय जगतां हितकारिणे ।
सोमार्धधारिणे नित्यं वैद्यनाथाय ते नमः ॥ ४॥

नीलकण्ठाय सौमित्रिपूजिताय मृडाय च ।
चन्द्रवह्न्यर्कनेत्राय वैद्यनाथाय ते नमः ॥ ५॥

शिखिवाहनवन्द्याय सृष्टिस्थित्यन्तकारिणे ।
मणिमन्त्रौषधीशाय वैद्यनाथाय ते नमः ॥ ६॥

गृध्रराजाभिवन्द्याय दिव्यगङ्गाधराय च ।
जगन्मयाय शर्वाय वैद्यनाथाय ते नमः ॥ ७॥

कुजवेदविधीन्द्राद्यैः पूजिताय चिदात्मने ।
आदित्यचन्द्रवन्द्याय वैद्यनाथाय ते नमः ॥ ८॥

वेदवेद्य कृपाधार जगन्मूर्ते शुभप्रद ।
अनादिवैद्य सर्वज्ञ वैद्यनाथ नमोऽस्तु ते ॥ ९॥

गङ्गाधर महादेव चन्द्रवह्न्यर्कलोचन ।
पिनाकपाणे विश्वेश वैद्यनाथ नमोऽस्तु ते ॥ १०॥

वृषवाहन देवेश अचिकित्सचिकित्सक ।
करुणाकर गौरीश वैद्यनाथ नमोऽस्तु ते ॥ ११॥

विधिविष्णुमुखैर्देवैरर्च्यमानपदाम्बुज ।
अप्रमेय हरेशान वैद्यनाथ नमोऽस्तु ते ॥ १२॥

रामलक्ष्मणसूर्येन्दुजटायुश्रुतिपूजित ।
मदनान्तक सर्वेश वैद्यनाथ नमोऽस्तु ते ॥ १३॥

प्रपञ्चभिषगीशान नीलकण्ठ महेश्वर ।
विश्वनाथ महादेव वैद्यनाथ नमोऽस्तु ते ॥ १४॥

उमापते लोकनाथ मणिमन्त्रौषधेश्वर ।
दीनबन्धो दयासिन्धो वैद्यनाथ नमोऽस्तु ते ॥ १५॥

त्रिगुणातीत चिद्रूप तापत्रयविमोचन ।
विरूपाक्ष जगन्नाथ वैद्यनाथ नमोऽस्तु ते ॥ १६॥

भूतप्रेतपिशाचादेरुच्चाटनविचक्षण ।
कुष्ठादिसर्वरोगाणां संहर्त्रे ते नमो नमः ॥ १७॥

जाड्यन्धकुब्जादेर्दिव्यरूपप्रदायिने ।
अनेकमूकजन्तूनां दिव्यवाग्दायिने नमः ॥ १८॥

इति श्रीवैद्यनाथस्तोत्रं सम्पूर्णम् ।

Proofread by PSA Easwaran

*Shri Vaidyanatha Stotram*

pdf was typeset on September 11, 2021

Please send corrections to *sanskrit@cheerful.com*